# COOCH BEHAR PANCHANAN BARMA UNIVERSITY

B.A. Honours 2nd Semester Examinations, 2022

## SANSKRIT

## CORE-3

Time Allotted: 2 Hours Full Marks: 40

*The figures in the margin indicate full marks.*

### UNIT-I

1. कस्यापि एकस्य उत्तरं प्रदेयम् – 15×1 = 15

(क) अभिज्ञानशकुन्तलमाश्रित्य 'उपमाकालिदासस्य' इत्युक्तिः विवेचनीया।

(ख) अभिज्ञान शकुन्तलमनुसारं दुर्वाससः शापवृत्तान्तस्य नाटकीयतात्पर्यमालोचयत।

2. सरलसंस्कृतभाषया एकस्य व्याख्या कार्या (देवनागरीलिप्यां लेखनीयम्) – 6×1 = 6

(क) आपरितोषाद विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपिशिक्षितानामात्मन्य प्रत्ययं चेतः॥

(ख) शमप्रधानेषु तपोधनेषु गूढं हिदाहात्मकर्मस्ति तेजः।
स्पर्शानुकूला इव सूर्यकान्तास्तदन्यतेजेऽभिभवाद् वमन्ति॥

(ग) अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामंप्रत्यर्पितन्यास इवान्तरात्मा॥

3. मातृभाषया आङ्गलभाषया वा कस्यचिद् एकस्य अनुवादः कार्यः – 4×1 = 4

(क) चित्रे निवेश्य परिकल्पितसत्त्वयोगा –
रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्न सृष्टिरपरा प्रतिभाति सा मे –
धातुर्विभुत्व मनुचिन्त्यवपुश्च तस्याः॥

(ख) शुश्रूषस्व गुरुन्कुरु प्रियसखीवृत्तिं सपत्नीजने–
भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥

Digitised by Mr. Binoy Sharma, Librarian, Cooch Behar College.

4. अधोलिखितेषु पञ्चानामुत्तरं सरलसंस्कृतेनदेवनागरीलिप्या प्रदेयम्। 1×5 = 5

(क) शकुन्तला कीदृशी नायिका ?

(ख) कुलपतिः कण्वः किमर्थं सोमतीर्थं गतः ?

(ग) अभिज्ञान शकुन्तले मुख्यः कः रसः ?

(घ) का आसीद् गौतमी ?

(ङ) शकुन्तलायाः मातुः पितुश्च नाम किम् ?

(च) कः आसीद् शारद्वतः ?

(छ) अभिज्ञानशकुन्तलनाटकस्य नान्दीश्लोके कस्य देवस्य सुतिः विहिता ?

(ज) क उच्यते सूत्रधारः ?

## UNIT-II

5. अधःस्थितेषु पञ्चानाम् उत्तरं सरलसंस्कृतेन देवनागरीलिप्या प्रदेयम् – 1×5 = 5

(क) छन्दोमञ्जरी केन प्रणीता ?

(ख) का नाम यतिः ?

(ग) पद्यं किम् ?

(घ) किं नाम समवृत्तम् ?

(ङ) क उच्यते म-गणः ?

(च) कस्मिन् गणे भवति सवी लघुः ?

(छ) मालिनी छन्दसः उदाहरणं दीयताम्।

(ज) इन्द्रवज्रा छन्दसः किं लक्षणम् ?

6. अधोलिखितेषु कस्यापि एकस्य छन्दसः संस्कृतभाषया देवनागरीलिप्या सोदाहरणं संज्ञानिर्देशं कुरुत। 3×1 = 3

शिखरिणी, शालिनी, वंशस्यविलम्, रुचिरा।

7. अधोलिखितेषु एकस्य संस्कृतभाषया देवनागरीलिप्या गण पूर्वकं छन्दो निर्णयं कुरुत। 2×1 = 2

(क) इदं किलाव्याज मनोहरं वपुः।

(ख) सरसिज मनुविद्धं शैवलेनापि रम्यम्।

(ग) कश्चित् कान्ता विरहगुरुणा स्वाधिकारात्प्रमत्तः।

——×——

Digitised by Mr. Binoy Sharma, Librarian, Cooch Behar College.

# COOCH BEHAR PANCHANAN BARMA UNIVERSITY

B.A. Honours 2nd Semester Examinations, 2022

## SANSKRIT

## CORE-4

Time Allotted: 2 Hours Full Marks: 40

*The figures in the margin indicate full marks.*

### UNIT-I

1. संस्कृतभाषया एकस्य उत्तरं प्रदेयम् (देवनागरीलिप्यां लेखनीयम्) – 10

(क) 'नारिकेलफलसम्मितं वचो भारवेः' इत्युक्तेः याथार्थ्यं प्रतिपादनीयन्।

(ख) वनेचरशब्दस्य का व्युत्पत्तिः ? वनेचरेण युधिष्ठिराय दुर्योधनराज्यशासनसम्बन्धिनी या वार्ता विनिवेदिता तत्किरातमवलब्य वर्णनीयम्।

2. संस्कृतभाषया देवनागरीलिप्यां च कस्यचिदेकस्य व्याख्या कार्या – 5×1 = 5

(क) स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किम्प्रभुः।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः॥

(ख) द्विषन्निमित्ता यदियं दशा ततः
समूलमुन्मूलयतीव मे मनः।
परैरपर्यासितवीर्यसम्पदां
पराभवोऽप्युत्सव एव मानिनाम्॥

3. संस्कृतभाषया देवनागरीलिप्या च पञ्चानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् – 1×5 = 5

(क) 'किरातार्जुनीयम्' इति कीदृशं पदम् ?

(ख) दुर्योधनस्य सामदानोपायः कीदृश आसीत् ?

(ग) किरातार्जुनीयम् इति काव्यस्य वृत्तान्तं कस्माद् ग्रन्थाद् गृहीतम् ?

(घ) के अरिषड् वर्गाः ?

(ङ) 'न बाधतेऽस्य त्रिगणः परस्परम्'– इत्यत्र त्रिगणशब्देन कः परामृष्टः ?

(च) कीदृशं भूपतीनां चरितम् ? कीदृशं वा जन्तू नाम् ?

(छ) वृकोदरः कः ? कथं तस्यं एवमभिधा ?



Digitised by Mr. Binoy Sharma, Librarian, Cooch Behar College.

अथवा

कस्यचिदेकस्य श्लोकस्य पादं पूरयत। 5

(क) श्रियः कुरुणामधिपस्य ...............

...................................... वनेचरः॥

(ख) ब्रजन्ति ते .......................

................ असंवृताङ्गान् निशिता इवेषवः॥

**UNIT-II**

4. कस्यचिदेकस्य प्रश्नस्योत्तरं कार्यम् – 10×1 = 10

(क) प्रस्तावनायाः का व्युत्पत्तिः ? किं प्रस्तावना लक्षणम् ? कति प्रस्तावना भेदाः ? के च ते ? कस्यचिद् भेदद्वयस्य आलोचनं कुरुत।

(ख) का अर्थप्रकृतिः ? कतिविधा सा ? भेदद्वयं सोदाहरणमालोचयत।

(ग) कः सन्धिः ? कतिविधः सः ? कस्यचिद् भेदद्वयस्य आलोचनं सोदाहरणं कुरुत।

5. कस्यचिदेकस्य संक्षिप्ता टिप्पणी लेख्या – 5

नान्दी, रूपकम्, वीथी, अभिनयः।

6. सरलसुरगिरा नागरीलिप्या च पञ्चानां लघुप्रश्नानामुत्तरं कार्यम् – 1×5 = 5

(क) 'नाटकंख्यातवृत्तंस्यात् पञ्चसन्धिसमन्वितम्' इत्यत्र कानि विशेषणपदानि किञ्च विशेष्यपदम् ?

(ख) वृत्तिः कतिविधा ? कश्चि ताः ?

(ग) उपरूपकाणि कति ? कस्यचिद् द्वयस्य नामोल्लेखं कुरु।

(घ) सट्टके का भाषा व्यवद्रियते ?

(ङ) को नाम अङ्कावतारः ?

(च) कः पूर्वरङ्गः ?

(छ) नटी का ?

——×——

Digitised by Mr. Binoy Sharma, Librarian, Cooch Behar College.